# कमलपञ्चशतिका-स्तोत्र ॥

-सं. विजयशीलचन्द्रसूरि

आ कृति ए संस्कृत काव्य-साहित्यना एक अद्भुत नजराणां समान कृति छे. १३० पद्योमां पांच जैन तीर्थंकरोनी स्तवना करती आ रचनानी खूबी ए छे के तेना प्रत्येक पद्यना प्रत्येक चरणमां 'कमल' शब्द गुंथी लेवामां आव्यो छे; अने एनो अर्थ प्रत्येक चरणे भिन्न भिन्न छे. १२८ गुण्या ४=५१२ थाय; ए रीते आमां ५१२ वार 'कमल' शब्द भिन्न भिन्न अर्थमां गुंथी लेवामां आवेल छे. आमां श्लेष आदि अलंकारोनो तथा विविध शब्दसंयोजनोनो आश्रय, अलबत्त, लेवामां आव्यो ज छे. परंतु तेथी कविनी क्षमतामां स्हेज पण ऊणप आवे तेम नथी; खरेखर तो एमां ज कविनी क्षमता प्रगट थई छे. अने आ कारणे, कविए स्वयं प्रयोजेलुं 'कमलपञ्चशतिका' एवुं नाम पण सार्थक बने छे.

पराकाष्ठा तो त्यां छे के कर्ताए ४ पद्यो (१२१ थी १२४) प्राकृत भाषामां लख्यां छे, अने तेमां प्रत्येक चरणमां 'कमल' शब्द प्रयोजी बताव्यो छे !

आ रचनाना सर्जक **पंडित हर्षकुल गणि**, इतिहासकारोनी नोंध प्रमाणे विक्रमना १६मा शतकमां थई गया छे, अने ते गच्छाधीश **श्रीहेमविमलसूरिना** शिष्य हता. तेमणे **सूत्रकृतांगसूत्र** पर '**दीपिका**' टीका, **मुग्धावबोध-औक्तिकनी** टीका, **कविकल्पद्रुम, काव्यप्रकाशटीका** वगेरे अनेक ग्रंथो रच्या छे. (जैन सं.सा.नो इतिहास-१, -ही.र. कापडिया, पृ. ५१, २८८ व. प्र.ई.१९५६, वडोदरा)

आ स्तोत्रनी एक प्रति छाणीना प्र. श्रीकांतिविजयजी शास्त्रसंग्रहमां उपलब्ध छे (क्र. ७९१). तेनी झेरोक्स कोपीना आधारे प्रस्तुत संपादन करवामां आव्युं छे. प्रतिनां ८ पत्र छे, अने सर्वत्र टिप्पणो नोंध्यां छे, जे उकल्यां तेवां अत्रे पण मूकी आप्यां छे. प्रतिमां लेखन संवत् नथी, परंतु पडिमात्रानी लिपि तथा प्रांते पुष्पिकारूप उल्लेख वगेरेने आधारे कर्तानी पोतानी लखेली के पछी कर्तानी नजर समक्ष लखायेली प्रत होय तेम अनुमान थाय छे. आदिनाथ, शांतिनाथ, नेमिनाथ, पार्श्वनाथ अने महावीरस्वामी-एम पांच तीर्थंकरोनी संयुक्त स्तुतिस्वरूप आ रचनामां एकाधिक स्थले आदिनाथ वगेरे एक प्रभुनुं नाम लखीने, अन्य ४ नामो पण त्यां जोडी देवानी-जोडीने वांचवानी सूचना, कर्ताए आपी छे.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आ स्तोत्रनो एक अंश, संभवत: २५ पद्यो प्रमाणनो अंश, साराभाई नवाबे संकलन करेल प्राचीन जैन स्तोत्र सन्दोहमां जोयानुं सांभरे छे. परंतु समग्र स्तोत्रनी तो तेमने पण जाणकारी नहोती, ते पण तेमांनी नोंध थकी स्पष्ट थाय छे.

## पं. हर्षकुलगणिकृत
## कमलपञ्चशतिका-पञ्चजिनस्तोत्र सटिप्पण ॥

श्रीनिर्वृति**कमल**दृशः कर**कमल**क्रीडनैककलहंसम् ।
प्रणतापूरित**कमलं**[1] प्रात:समये सुदृष्टमुख**कमलम्** ॥१॥
जिनपं सश्री**कमलं** सुरनायकसेव्यमानपद**कमलम्** ।
प्रतिपादं **कमल**पदैः पृथगर्थैः स्तौमि [2]वर**कमलम्** ॥२॥ युग्मम् ॥
अक्षीणलक्ष्मी**कमल**ङ्घनीयवाचं भवामे [3]**कमला**भिधानम् ।
दीनोल्लसत्शू**कमल**ब्धदोषं पङ्कप्रणाशे [4]**कमल**स्वभावम् ॥३॥
युगादिनाथं [5]**कमला**ङ्कवक्त्रं गीतप्रतापं [6]**कम**[8]**ला**ननाभिः ।
संसारदुष्टाऽ[7][9]**कमल**प्रमुक्तं स्तवीमि निःशङ्कमलास्यरङ्गम् ॥४॥
अनंतसंवित्**कमलं** भजे विभुं स्वपाणिदीप्त्या [10]**कमला**[12]ऽ[13]पलापिनम् ।
अचाल्यचित्तं [11]**कमला**विलासतो नश्यत्तमःशो**कमल**क्ष्मविग्रहम् ॥५॥
मात्राधिकत्वात्**कमले**[14] न तुष्यसि प्रियप्रदः [15]सत्**कमल**ोपलक्षितः ।
जिनेन्द्र[16]मुक्ता**ङ्कमल**क्ष्यदर्शनः पदं न नम्रं **कमलं**भयः शुभम् ॥६॥
बाह्यं तथांतरमसौ **कमलं**[17] भिनत्ति मात्राधिकं [18]**कमलवं** न दधाति माने ।
एनोगतांशकमलंबपरप्रभाव [19]भूभृद्[20]रां**कमल**सेतरतुल्यसेव्यम् ॥७॥
पश्यन्तमे**कमल**काधिपतीभ्यपूज्यं सेवे शिवार्प**कमल**क्तकरक्तपादम् ।
क्षोणीविशे[21]**कमलं**कपदाब्जसक्त- [22]सच्चञ्चरी**कमल**कोच्चयवृद्ध्यपेतम् ॥८॥
व्याख्याक्षणे [23]**कमल**भूश्चतुराननत्वात् ख्यातस्तथा [24]**कमल**बन्धुरिव प्रतापी ।
पद्मापतिः [25]**कमल**नाभिरिव प्रभुस्त्वं ध्यानं करोषि [26]**कमला**सनमाश्रितः सन् ॥९॥

---

१. लक्ष्मी, २. शोभा, ३. औषध, ४. जलरूपं, ५. मृगाङ्क, ६. स्त्रीभिः, ७. पापमलेन मुक्तः, ८. नृत्य, ९. कं सुखं मलं निधरति, १०. ताम्र, ११. वराङ्गना, १२. निःकलङ्क, १३. शरीरं, १४. कामे, १५.क्षौम, १६.कलङ्क, १७.रोगं, १८.कामेच्छा, १९.नृप, २०. रङ्क, २१. अरङ्कं पुष्टं, २२. उत्तमभ्रमरं, २३. ब्रह्मा, २४.रविः, २५.कृष्ण, २६.पद्मासन ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संक्षिप्तशो[1]कमलयाद्रिजशीतवाक्यं विस्तार्यशो[2]कमलपन्तमवद्यवाचम् ।
मात्रोल्ल[3]सत्कमलसंसृतिकल्पवृक्षं सत्पुण्यतो[4]कमलवद्भिरनाप्यमीडे ॥१०॥
माना[5]ह्य[6]शो[7]कमलमुक्तपरित्यजन्तं संस्तौम्यभी[8]कमल[9]युक्वनिताङ्गरत्नम् ।
क्षिप्तार्यनीकमलघुप्रशमोपसेव्यं त्वां मात्रिकाधि[10]कमलं श्रयतां दविष्टम् ॥११॥
संभूषितांत[11]कमलर्कसमं घनासौ त्यक्तातुलांशुकमलज्जमपीशरम्यम् ।
सत्सेवितांति[12]कमलव्रजदत्तदुःखं श्रेयोलतासु [13]कमलं किल मात्रयाढ्यम् ॥१२॥
अंहस्तमोऽ[14]कमलपूज्यसमात्रिकत्वे निर्नाशितान्त[15]कमलक्ष्मिकृतानुकम्पम् ।
श्रेयःकुलाङ्क[16]मलयो[17]चलकैरगम्यं सङ्क्षिप्त[18]कल्[19]कमललंन्तमिनं वशाभिः ॥१३॥
नष्टान्तराय[20]कदल[21]कमलाभमद्रमेघः समात्रिकतया[22]कमला[23]ढ्य देहम् ।
त्यक्त्वा सुराङ्क[24]मल[25]षन्नपि मे समेतो मोक्षं [26]निरङ्कमल[27]भापगमं विधेहि ॥१४॥
अनेकार्थान् जल्पन्नकमलमुखान् शब्दनिवहाँ-
स्तथैवाचक्षाणः कमल[28]वमुखान् वर्णनिकरान् ।
क्रियाकाण्डे सम्यक्कमलकलितं तारयसि नो
मयि श्रेयोलक्ष्मीकरशुकमल[29]स्वार्द्रनयनम् ॥१५॥
जयश्रीमन्नेतः [30]कमल[31]लमहामान्यमहिमा
प्रबोधं तन्वानः [32]कमल[33]सदृशाऽमित्रजनयोः ।
तुषारस्फारश्री[34]कमल[35]तुलनामेति जिनवाक्
चरित्रश्रीकर्णे कन[36]कमलवद्भाति भगवान् ॥१६॥
भवं व्यापद्वार्द्धेः [37]कमला[38]ति भवान् शोषकरणे
यशःप्राञ्चत्पुष्पस्तब[39]कमललान्तङ्कहरणे ।
सुराधीशाभ्यर्च्यः [40]कमल[41]सदृशत्वेन विदितः
सदारिष्टाघाते जयति [42]कमलाधीशमहिमा ॥१७॥

---

१.चन्दन, २. वृक्ष, ३. मरुदेश, ४.अपत्य, ५. सर्प, ६. वञ्जुल, ७.कलङ्क, ८. निर्भय, ९.विष्टा, १०.मालं कपटे, ११.अन्वय (अन्तक-यम?), १२.कंदर्प १३.कामलं वसन्ते, १४. जन, १५.यम, १६.ध्मात, १७. चेतः, १८.पाप, १९.लड विलासे, २०. रोगीश्वा, २१.मालं वन, २२. अकं दुःखं, २३. मालं वसादि २४.अङ्को नाटकं, २५.लषी कान्तौ-अनिच्छन्, २६.अङ्कः कलङ्कः, २७.अलभा-लाभान्तरायत्यागः, २८.वकाराद्यान्, २९. धारय, ३०.रविः, ३१.मंडल, ३२.मित्र, ३३.एरण्ड, ३४.को वायुः शीतलत्वात्, ३५.मंडः सर्वरसाग्रं सरसत्वात्, ३६.मण्डो भूषणं, ३७.कोऽग्निः, ३८.मण्डो बाणम्, ३९.मण्डलः सर्पविशेषः, ४०.को मयूरः, ४१.तस्य मण्डं पिच्छं, ४२.कृष्णः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गिरीशः श्रीसार्व्वप्रकट[१]**कमला**ङ्गोद्भवहृतौ
गभीरः श्रीपार्श्वः [२]**कमल**निधिवत्सद्गुणमणिः ।
जनान्तर्बाहीकाभय[३]**कमल**कारः कलिमलं
मम च्छिन्द्यादीश ! [४]**कमल**रिपुवद्विश्वविपिने ॥१८॥
ददानः सद्बोधं [५]**कमल**जनतानामपि विभो!-
ऽद्वितीयत्वे पूर्णः [६]**कमल**श इव प्रीतिकरणः ।
परिस्फूर्जत्कीर्त्ति स्फुरति [७]**कमला**भृद्द्युतिसिता
क्रियाणां पुण्यानां तवक[८]**कमला**पं प्रवदतः ॥१९॥
प्रतीक्ष्यः स्वर्गाधीश्वर[९]**कमल**नाथादिमसुरै-
महातेजस्त्वेन त्वमसि [१०]**कमलः** कर्मदहनः ।
सतां विघ्नव्यापव्यपगमविधौ [११]भूष**कमल**-
स्तव श्लोकः पूर्णं [१२]**कमल**भवमप्याशु जितवान् ॥२०॥
तमोदैत्यध्वंसे [१३]**कमल**शयवद् भाति भुवने
नमत्पुंसामीशो [१४]भवि**कमल**(ला)लीनिर्मितिचणः ।
परिक्षिप्तन्यक्षाऽ[१५]हित[१६]**कमल**लः पावनगति-
र्जगत्प्रौढावासांगण[१७]**कमल**लीभूतसुयशाः ॥२१॥
चिरंजीयात्सार्वः [१८]**कमल**रुहपाणिक्रमयुगः
स्वयंभावात्सेवाऽणु[१९]**कमल**[२०]लगीर्वाणनिकरः ।
सदा सम्यग्निर्नाशितनिजयशःस्ताव[२१]**कमलः**
चलन्मायुर्दुष्टज्वर[२२]**कमल**लाद्यामयहर(:) ॥२२॥
यदाऽहं त्वत्सेवां [२३]च**कमल**भिकर्मीकृतसुख-
स्तदास्यां सत्पुण्यात्[२४]**कमल**ऽसि वधत्याजनकृते ।
चरित्रस्वीकारे [२५]**कमल**ऽयमलोसीन्द्रियदमे

---

१.स्मर, २.समुद्रः, ३.भैषजकारो वैद्यः, ४. मृगारिः सिंहः, ५.कमरो मूर्ख :, ६.कलश, ७.कलाभृच्चन्द्रः, ८.कलापम्, ९.जलपतिर्वरुणः, १०.मधूरधारी कार्त्तिकेयः, ११.गणेशः, १२.जलभवश्चन्द्रः, १३.जलशायी कृष्णः, १४.भविकक्षेममंडली श्रेणी, १५.रिपु, १६. मंडलः श्वा, १७. मंडलं परिधिः, १८. जलरुहं पद्मं, १९.निपुणः, २०.मंडलं द्वादशराजकं, २१.मंडः शोकः, २२. मंडलं कुष्टं, २३.अभिलषितवान्-आत्मनेपदमनित्यमिति, २४.कमठं आचष्टे, २५.कमठः कच्छपः स इवाचरतीति कमट् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ममत्वान्निर्मुक्तः [1]**कमल**पि यथा नैव भवसि ॥२३॥
शरप्रासप्राञ्चत्[2]**कमल**मुखशस्त्राङ्कितकरो
गृहस्थस्त्वे स्वामी [3]**कमल**करणो नैव चरणे ।
मदक्रोधव्यापत्[4]**कमल**भरनिर्नाशनचणः
प्रणम्यः श्रेयःश्रीयुवति[5]**कमल**स्त्वं तनुमताम् ॥२४॥
यथावर्ण[6]ज्येष्ठः [7]**कमल**नलमर्वत्यनुदिनं
सुरज्येष्ठं स्पष्टं [8]**कमल**निशमाशंसति यथा ।
यथा [9]चाहर्नाथं [10]**कमल**ति नयादर्कयति वा
त्वदेकत्राणस्त्वाम[11]णु**कमल**हं स्तौमि च तथा ॥२५॥
युवापि त्वं स्वामी [12]सुम**कमल**धिक्कारनिपुण-
स्तनः ख्यातो गौरी[13]**कमल** इव दुष्टान्धकहरः ।
नवव्याख्याकाले [14]**कमल**धर[15]विस्तारिनिनदः
स्वयं पूज्यः स्वामी ननु [16]**कमल**या भक्तिवशतः ॥२६॥
निर्निक्तीकृतसत्स[17]हस्र**कमलः** स्वांह्रिद्वयस्पर्शनैः
पूज्यस्त्वं **कमल**[18]प्रभादिभिरभूत्त्वद्वाग्रहस्यं विभो ! ।
जानानः **कमल**[19]प्रभोप्यपलपत्संसारचक्रभ्रमी
श्रीपालं [20]**कमल**प्रभेव सुषुवे त्वामीश ! वामोत्तमम् ॥२७॥
प्रस्फूर्जत्[21]**कमल**प्रभावजलधिख्यातप्रतापोदयः
श्रीसार्वः [22]**कमल**स्वरामृतवरद्वीपानुगच्छद्यशाः ।
ध्वस्ताऽनी[23]**कमल**[24]प्रभः प्रथयतात्सन्तापनिर्वापणे
सौख्यं जन्मनि निःकल**ङ्कमल**ले पूर्णेऽपि शान्तिप्रदः ॥२८॥
अद्धैणाङ्कविभास्य[25]ऽली**कमल**[26]यस्युर्वीतलं पत्कजैः

---

१.कमठं मुनिभाजनं वहतीति कमट्, २. कमरं धनुः, ३. क्रमरं कोमलं कोमल-शरीरं, ४. कमरश्चौरः, ५. कान्त, ६.विप्रः, ७. कं अग्नि महतीति कमट्-अग्निहोत्री, ८.कं ब्रह्माणमहनीति-ब्रह्मार्च्चकः, ९. सूर्यं, १०. कं सूर्यं महतीति कमट् सूर्यार्चकः, ११. अणुकं स्वल्पं मवति माद्यतीति स्वल्पमदोहं, १२. पुष्पधनुः कामः, १३. ईश्वरः, १४, जलधरो मेघः, १५.शब्दः, १६. कालव्यन्त-राग्रमहिषी, १७.शि(श)त्रुञ्जयः, १८. व्यन्तरपत्नी, १९. गुरुः, २०.माता श्रीपालस्य, २१.पुष्करवरोदधि, २२. पुष्करवरद्वीप, २३.रण, २४.मण्डा आमलकी तस्याः फलं मण्डं, २५. ललाट, २६. मण्डयसि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सञ्जातः किल निःकलङ्क**कमल**[१]लाधीशान्वये त्वं जिनः ।
त्वद्वाचं[२] **कमल**व्रजा निजगिरा श्रृण्वन्ति हर्षोन्नताः
पार्षद्येषु कृतान्तत**कमल**[३]लप्रादुष्कृतिप्रत्यलः ॥२९॥
संसारश्रान्तलोके [४]**कमल**लवति यः पापतापापनोदा-
दग्रे संवाद्यमानान[५]**कमल**[६]लवदुद्दामतेजाः सुरौघैः ।
नम्रीभूतक्षमाभृद्रण**कमल**[७]लभृन्निर्मलश्लोकराशेः
निर्हाराधःकृतश्रीपि**कमल**[८]लभृदायासमे सेवकास्ते ॥३०॥
क्षोणीपावित्र्यहेतोः [९]**कमल**लवदिदं पाद पद्मद्वयं ते
नैवाज्ञानप्रवृत्तैः [१०]**कमल**लुधरणैः श्रीयते सौख्यदायि ।
भक्तप्रत्यूहनाशाम्बि[११]**कमल**[१२]नमिव ब्रह्मलक्ष्म्यास्तमौघे
सर्पालोकप्रवृत्ताम्बि[१३]**कमल**[१४]नजनासेव्यपार्श्वोऽसि पार्श्वः ॥३१॥
क्षोणीविख्यातकीर्त्यान[१५]**कमल**[१६]यमुखानेकदेशस्थलोकान्
स्वव्याहारेण लक्ष्मीजलधिरनुदिनं बोधयन्बोधिसाधुः ।
इत्थं स्पष्टार्थमाद्यन्मधु**कमल**भरैः पूज्यपादारविन्दः
**श्रीपार्श्वो हेम**शुद्धाभरणधरतनुः श्रेयसे संश्रितानाम् ॥३२॥
॥इत्येकं श्रीपार्श्वस्तोत्रम् ॥ शतार्थो(र्थि)**पण्डितश्रीहर्षकुलगणि**प्रणीतम् ॥

श्रेयः सदङ्[१७]**कमल**योन्नतिमेघनादमुत्सर्पिदर्प**कमलो**[१८]पमयाऽक्षिपन्तम् ।
वाचापि [१९]का**कमल**जं प्रतिबोधयन्तं वीरं गताधि[२०]**कमलं** जिनराजमीडे ॥१॥
सम्पूर्णशान्ति[२१]**कमल**ासिविमुक्तपाणिः सोढुं सुदुःश[२२]**कमला**सनमेः[२३] प्रभञ्जन् ।
मिथ्या सतां वदसि लो**कमल**[२४]प्रभूतं कुर्वञ्जगत्[२५]**कमल**[२६]धारिवशाभिरर्च्यः ॥२॥[२७]

१. मण्डलाधीशो राजा, २. मृग, ३.मंडलं समूहः, ४.कमण्डलुः प्लक्षवृक्षविशेषः स इवाचरति कमण्डलवति, ५.मृदङ्ग, ६.मंडलं विद्यते यस्य स मण्डलवान् सूर्य :, ७. मंडलं सर्पं बिभर्तीति मंडलभृदीश्वरः, ८. मण्डलं श्वानं बिभर्त्ति वाहनतया स मण्डलभृत् क्षेत्रपालः, ९. कमण्डलुः कुण्डिका तद्वदाचरत् कमण्डलवत्, १०.कमण्डलुधारकैस्तापसैः, ११. अम्बिका पार्श्वोपासिकादेवी, १२. मण्डनमलङ्कारः, १३. अम्बिका माता, १४. मण्डनाय अलङ्करिणवो जना इभ्यादयः, १५.पटह, १६.देश, १७.सदङ्कं सदभिज्ञानं मलयं वनं नन्दनादि, १८. अण्डं मुष्कं तस्योपमया- निन्द्यत्वेनेत्यर्थः, १९.काकमण्डजं पक्षिणमपि, २०.अम्बिका कैतवं, अरं अत्यर्थं, २१. अण्डं शरं, असि खड्गः, २२.अण्डासनं धनुः २३. इः कामः, २४.पेशी-अण्डं पेशीति वचनात्, २५. प्रकाश, २६.अण्डधारिणः पुरुषाः, २७.प्रथमकाव्यद्वयं पार्श्वोपयोगि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुर्व्वन्समृद्धमिह नि:[1]कमलं स्वभक्तं मात्राधिकत्ववशत: [2]कमलं[3]धनाढ्य: ।
तुल्यीकृतस्फुरदशो[4]कमला[5]जमाषमानव्यथासु धन[6]कल्कमलाकवेऽसि ॥३॥
क्षेमैर[7]भी[8]कमलवन् विषयाम्बुशोषे प्रातर्निभाल्य[9]कमलोऽसि [10]यमध्यमत्वे ।
धन्यो जिनेश [11]कमलासि[12]च यत्र दृष्टः सारो भवेऽत्र [13]कमलामखिलामवैषि ॥४॥
सर्वस्फुरत्[14]कमलनं प्रवहद्गुणानां को वेत्ति ते [15]कमलनं नयनन्दितेश ! ।
प्रौढप्रभाव[16]कमलावदभिष्टुतस्य शीतद्युतेश्च [17]कमलाशुचिकीर्त्तिभाजः ॥५॥
वीक्षेऽविपक्ष[18]कमलाभृदपूर्ववक्त्रं सिद्धान्तनिर्मितिकृते [19]कमलाभृदाभ ! ।
संस्मर्यकार्यविधये [20]कमलाविदादौ धीरश्रिया रुचिर ! ते [21]कमलाधिपाङ्क !॥६॥
मात्राधिकत्ववशतः [22]कमलम्भनाय सामर्थ्यभाक्कमल[23]लाभसमः क्षमायाम् ।
संगुप्तसत्कमल[24]लद्गुणराशिरीशः सार्वः सपाप[25]कमलाभमभाषमाणः ॥७॥
मुनिर्मात्राधिक्यात्[26]कमललतिलीलाशमरतो
वदन् जन्तूत्पत्तिं नर[27]कमलवे कालवशतः ।
शुभे लग्ने जातः कमल[28]गजसद्योगकलिते
श्रयन् रेखाः पाणौ कमल[29]हरिहंसाकृतिधरा ॥८॥
बाभास्यमध्यमतया [30]कमलङ्कमुक्तः पर्षद्गतः [31]कमलमीशवचस्तनोषि ।
देवासुरैः [32]कमलगीतयशाः प्रशस्यो बाल्यस्थितः [33]कमलभायितविग्रहस्त्वम् ॥९॥
दुर्वादिनां [34]कमलहं वचसा भिनत्सि शास्त्रोद्भवं [35]कमलधौतशरीरकान्तिः ।
धान्ये यथा [36]कमलमोसि नरेषु मान्यस्तद्वद्विभुः [37]कमलहंसगतिः प्रतीतः ॥१०॥

---

१. कमलारहितं-दरिद्रं, २.कामलं-को यमडास्य(?) स एव आमो रोगः, ३.लङ्घने-उल्लङ्घने, ४.कटुरोहिणी, ५.'रा', आमा अपक्वा राजभाषास्तत्समो मानः, ६.कल्कं पापं तदेव आमो रोगविशेषः, ७.कम्र, ८. मरुदेशः स इवाचरन्, ९.कमलमिव कमलं मुखं, १०.इवर्णादेरिति परतो यत्वे-यमध्यमत्वमितिरूपं, ११.कलीकालः स धन्यः, १२.असि त्वं, १३.कला विज्ञानं, १४.कलनं ज्ञानं, १५.कलनं सङ्ख्या, १६. कमलावता विदुषा नरेण स्तुतः, १७. कला, १८.कलाभृच्चन्द्रः, १९.कलां शिल्पं बिभर्त्ति इति कलाभृत्सूत्रधारः, २०. कलामूलधनवृद्धिस्तां वेत्तीति कलावित् व्यवसायी तेन कार्यं आदौ स्मर्त्तव्यः, २१.कमलो मृगः मृगाधिपः सिंहः स एव अङ्कं यस्य स वीर इत्यर्थः, २२.काम इच्छा, २३. कर्मेत्यर्थः २४. कामो बलं, २५. अनुमति(:), सपापस्य सावद्यस्य कामेऽनुमतौ लाभमभाषमाणः, २६.कामं कन्दर्पं लडति उन्मथयति-लडजिह्वोन्मथने, २७.वीर्यं, २८.ज्योतिष् योगो, २९. पद्माकाररेखा, ३०.कलङ्क, ३१. कलं मनोज्ञं, ३२. कलोऽव्यक्त-मधुरध्वानस्तेन गीतं यशो यस्य, ३३.कलभो लघुहस्ती, ३४.कलहं, ३५.कलधौत, ३६.कलम, ३७.कलहंस ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वामित्रशो**कमल**[1]गर्ददब्रव्यपाये संसारदु:ख[2]**कमला**[3]लाघयुतं रिपूणाम् ।
निर्नाशने [4]**कमल**घोषसमान घोषं भावामये [5]**कमल**हारिसमं समात्रम् ॥११॥
जन्तोस्तप:स्फुरदशोक[6]मल[7]प्रणाशे ताम्रस्य चम्पकम[8]लन्दसुगन्धिवस्त्र: ।
उल्ला[9]स्यनू[10]**कमल**शंकमुपास्तिकारी य: स्यात्तव स्व**कमल**लाञ्छनमातनोति ॥१२॥
हन्मे[11]ध्यता**क्कमल**[12]वत्प्रतिपक्षमात्राधिक्यादली[13]**कम**[14]**लं**सि प्रशमात्प्रहन्तुम् ।
उल्लास्यली[15]**कमल**[16]वत्तनुसाधुनम्य: क्षिप्तव्य[17]ली**कमल**[18]वन् स्थिरतागुणेन ॥१३॥
दुष्टाम[19]चन्द्र**कमल**त्रनुवेलमीशस्पष्टं सिता[20]**कमल**पातकतापलोपे ।
सद्रो[21]स्तनी[22]**कमल**तुल्यवच:प्रपञ्च: निर्मोघ[23]माघ**कमल:**[23अ] सदरिष्टकुष्टे ॥१४॥
पादावनम्र[24]**कमला**ङ्गमुखग्रहौघ: साधूभवत्**कमल**[25]भाजनधारिविप्र: ।
विध्वस्तदु:[26]**कमल**सम्भवभीतिरीति: प्रत्यूहसञ्चयतम:[27]**कमल**स्वभाव: ॥१५॥
त्यक्त[28]व्यली**कमलं**[29]से [30]भुजगेश्वरे च राशीँश्च मध्य[31]**कमल**प्रमुखान्वदन्तम् ।
संवद्धितार्द्धि**धकमला**[32]दिजनस्यधन्यो यस्त्वत्पदान्ति[33]**कमला**[34]र्यत एव भक्त्या ॥१६॥
अम्बोदरान्तरतटा[35]**कमला**लशान्तिवल्ली[36]बलाङ्ग**कमलं**[37]ङ्गमरङ्गतुल्यम् ।
पूर्णाङ्गि[38]त**र्कमल**[39]वत्कलितं कराब्जे सम्यग्वित**र्कमल**[40]यँप्रियनादमोडे ॥१७॥
निस्तीर्णपात**कमला**दिह संयमं य: संसारशोष[41]**कमलो**चकवैरिवार: ।
पङ्केरुहा[42]**ङ्कमलं**योमुदमाप्ययद्वद्यान्तीश ताव**कमल**[43]म्बरिणो मतं तत् ॥१८॥

---

१.अलगर्द: सर्पविशेष:, २.संसारदु:खमेव कं जलं मवति बध्नति(मथ्नाति) कमव् - व्योरिति वलोप:, ३.सामर्थ्य, ४.कामलो वसन्त: वसन्तघोष: कोकिल:, ५. कामलो रोग: रोगहारी वैद्य:, ६. पारद, ७.किट्ट, ८.मरन्दो मकरन्द:, ९.उल्लासकृत्, १०.अनूकं शीलं तत्र मठति निवसति स्थिरीभवति इति अनूकमट्-शीलवान्पुरुष:, ११. पुण्यता, १२.अर्क: स्फटिक: मालवत्-मालु: स्त्री तद्वदाचरन्त: प्रतिपक्षा यस्य, १३.अवितथ, १४.अड उद्यमे, १५.भाल, १६. मालु: पत्रवल्ली कृत्वा तथा तद्वदाचरन्ती तनुर्येषां, १७.अप्रिय: १८.मरु: पर्वत: १९.चन्द्रकमलं-कर्पूरपानीयं यत्कर्णरोगंनाशयति, २०.साकरवाणी, २१.द्राक्षारस:, २२.कमलं जलं जलयोरव्यभिचारित्वात् कमलो रस:, २३.निर्मोघं सफलं गाघपानीयं माहवाणी इति, २३अ. प्रसिद्धं शत्रुञ्जयनीरं कुष्टहारित्वात्तत्सदृश इत्यर्थ: २४. कमलवत् अङ्गं यस्य स कमलाङ्गो रक्ताङ्गो मङ्गल इत्यर्थ:, २५. ताम्रभाजन, २६. कमल इव कमल: वृत्तत्वात्-रक्तत्वात्-तत्संभवो यम:, २७. कमल इव कमल: सूर्य : २८.व्यलीकं-अलीकं, २९.अलसीउं, ३०.नागराजे च, ३१.मध्ये को यत्र ईदृशो मलशब्द: मकर इति स्यात्, ३२. कमलश्रेष्ठी, ३३. पार्श्व, ३४.अरार्यते-प्राप्नोति, ३५.मराल, ३६. वसन्त, ३७.अरङ्ग, ३८. तर्को वाञ्छा, ३९.अरवत्-चक्रं, ४०. वनप्रिय: कोकिल:, ४१.अरोचको दीप्तिमान्, ४२.कमलोत्सङ्गं प्राप्य यथाऽलयोमुदं यान्ति, ४३.अडम्बरिण: संसारप्रपञ्चं मुक्त्वा तव मतं प्राप्य मुदं यान्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जनुष्यासीत्तेऽमः**कम**[1]कलल(**कमल**कल?) राशिर्महमयः ।
क्षमामध्ये क्षान्तः सपदि[2]**कमला**केलिकरणा ।
वदन्वेदार्थौघं जिन**कमल**[3]हंसांकसदृशः
भवाब्धेः संशोषे **कमल**शभवः शम्भवचणः ॥१९॥
**कमल**[4]मुखविपक्षो मध्यमाऽभावतस्त्वं
**कमल**[5]मुखकुरङ्गैः सेवनीयो वनान्ते ।
**कमल**[6]चरणभक्तैर्नैवलक्ष्यस्वरूपः
**कमल**[7]भयविमुक्तः प्राणमत्कन्धराणाम् ॥२०॥
**कमल**[8]जनकतेजाः सौख्यसम्पत्प्रदाता
**कमल**[9]जननरोव्यागेऽपि सन्तापहारी ।
कमल[10]मितमनन्तं मुक्तिसातं भवन्तं
**कमल**मुखसमस्त[11]व्यन्तरेन्द्रार्च्यमीडे ॥२१॥
सकल**कमल**[12]यातप्राज्यलब्धिप्रपञ्चः
सुमृदु**कमल**[13]णश्रीन्यक्कृतस्वर्णवर्णः ।
विशद[14]**कमल**कान्तस्थायिसन्नीरभाषः
प्रसृमर[15]**कमल**ङ्कोपद्रवद्रावकोऽसि ॥२२॥
सरुचि[16]**कमल**बालव्यालरौद्रे प्रघाते
निशित[17]**कमल**पत्रच्छिन्नवीरो[18]द्धजाते ।
हरिभर[19]**कमले**णुव्यासरूपे जयन्ते
विश[20] इह [21]**कमला**ले नामभाजो लभन्ते ॥२३॥
अरुण[22]**कमल**शाखः कल्पशाखीव विश्वे
दधि**कमल**[23]बंकाभव्याहृतिः शान्तिदाता ।
कुरुबक[24]**कमल**ञ्जोद्यानवासी व्रतस्थो

---

१.कलकील(कल)राशिः, २. कलाकेलिः कामः, ३.कलहंसाङ्को ब्रह्मा, ४.कलशभवोऽगस्तिः, ५.कमलमुखाः कृष्णाऽऽननाः, ६.कमलमुखा वानराः, ७.कालो-महाकालः, ८.कालो यमः, ९. कालो यमस्तस्य जनकः पिता सूर्यः, १०.कालो मरणं, ११.कालमनेहसं, १२.कालो व्यन्तरः, १३.करो हस्तः याता प्राप्ता, १४. करणं शरीरं, १५. करको नीरपात्रं, १६.करकः, करवाल, १७.करपत्र, १८. प्रत्रास्य, १९. करेणु, २०.नराः, २१.कराले, २२.करशाखो नखः, २३.करम्बः, २४.करञ्जः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गृहपतिकमलोटन्यादंकारी संकृच्च ॥२८॥

कमलमिव दिनेशः प्राप्य दत्ते कुयोगं

तदिव कमलपूजां वामदेवो जनानाम् ।

कमलभमिव पूर्णं पूर्णिमासीसु योगं

त्वमपि कमलरम्यो भक्तिभावं नतानाम् ॥२५॥

कमलमिव खगेनाब्जेन युक्तं सुकालं

जनजनकमलेखं वर्क्षमाख्याति सिद्धिम् ।

कमलभवकृतं सद्दुर्व्यवायं क्षिणोति

तदिव कमलजातप्रायधीरैः श्रितस्त्वम् ॥२६॥

सङ्क्रीडतीव उषया कमलाङ्क ईश ! त्वं वीरसिद्धिरमया कमलाभिरामः ।

तद्वच्चिरं कमलमाधिकसद्गुणः सन् दद्यान्महांसि कमलाङ्करुचिप्रतापः ॥२७॥

विश्वत्रयीकमलनप्रतिमान्तिमार्हन् गर्ह्येतराम्बककमलद्युतिकिण्वहारी ।

संसारतारकमलेखकपुष्यमुख्य नक्षत्रपेटकमलाजकमीश विश्वम् ॥२८॥

राज त्वदम्बककमलस्तनुषे वदंस्त्वं अंहःपुलाकमलवत्रघनिम्नगानाम् ।

---

१-२-३. मध्यमाभाव इति सर्वत्र योज्यं, करोटं भाजनविशेषस्तेनाऽन्यदपि पात्रं लक्ष्यते तत्र न्यादकारी-भोजनकृत्, ३अ.एकवारं, ४.कं यमं देवतात्वेन मलति धरति कमलं भरणी नक्षत्रं, ५. तथा, ६.मस्तकपूजां, ७.ईश्वरः, ८.कमग्निं देवतात्वेन मलते कमलं-कृत्तिका नक्षत्रं, ९.कं आत्मानं मलति कमलं शरीरं तेन रम्यो-रमणीयः, ९अ.नतानां भक्तिभावं प्राप्य सुयोगं दत्से, १०.कमलं ब्रह्माणं मलति-कमलं रोहिणी नक्षत्रं, 'रोहिणि चंददिवायर हाथिष्का दोघडीआइं'-इत्युक्तत्वात्, ११.सूर्येण, १२.अब्जेन-चन्द्रेण, १३-१४.मश्चन्द्रः स लेखो देवताऽस्य तत् मलेखमृक्षं नक्षत्रं मृगशरो नक्षत्रं, व इवार्थे, यथा मृगभं सूर्येण चन्द्रेण च सिद्धिमाख्याति तथा त्वमपि, १५.कमलं भरणीनक्षत्रं तस्माद्भवो राहुस्तत्कृतं दुर्व्यवायं दुष्टं विघ्नं क्षिणोषि, १६. कमलं रोहिणी नक्षत्रं, तस्माज्जातो बुधग्रहः, १७. कमलो मृगः ऋष्यनामा सोऽङ्के यस्य स कमलाङ्कोऽनिरुद्धो यथा उषया क्रीडति तथा त्वं सिद्धिरमया क्रीडसीति, १८.कमलशब्देन पद्माभिधानः संख्याविशेषः कमल इति मासंख्यातोऽप्यधिकगुणाः, १९.उत्सवान्, २०. कमलाङ्कः पद्मप्रभजिनस्तस्य कान्तिस्तद्वत्प्रतापोयस्य स, २१. कं मस्तकं तस्य मण्डनं मुकुटः, २२.अनिन्द्यः, २३. अम्बकं नेत्रं तस्य मण्डनं कज्जलं, २४.अर्थात् कृष्णं, २५.मो रुद्रः स लेखको देवता यस्य तत् मलेखकमार्द्रानक्षत्रं, २६. अराजकमनाथं, २७.अम्बकं लोचनं तस्मात्, महुड वृद्धौ मंहते धातूनामनेकार्थत्वात् जायते इति अम्बकमन् चन्द्रस्तद्वल्लसतीति क्विपि स्वादिदीर्घाभावे अम्बकमण्डलः, २८.सङ्क्षेप, २९.मरुः पर्वतः स इवाचरन् मरवन् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विद्वच्चकोर**कमल**[1]क्षणमुक्तदेह सन्देह[2]हारक[3]मल[4]स्य वचोविलासः ॥२९॥
वरतनु तार[5]**कमल**णः सत्यान्ध**कमल**[6]णभान्धकदघौघे ।
[7]नरकमलणाभनरकध्वंसे [8]सम**कमल**णाद्विरतः ॥३०॥
भूति**कमल**[9]कहरणः प्रणमद्[10]दश**कमल**बद्धसार्वायुः ।
[11]सूर्प्य**कमल**णविमुक्तः प्राणिभ्यो भावु[12]**कमला**सीत् ॥३१॥
चरणम[13]न**ङ्कमला**सीत्सत्यागदयाढ्यनन्द[14]**कमला**यः ।
[15]**कमला**ख्यमपि ददानस्तथा निधानं महा[16]**कमलम्** ॥३२॥
आन[17]म्रपा**कमल**णः स्वामी मध्य[18]**कमलं** निधिं यच्छन् ।
घ्नन् पृथु[19]**कमल**णगोयायजू**कमल**णोद्भवं दुरितम् ॥३३॥
मध्य[20]कमलकेतुहतः प्रसन्नता[21]र**कमल**[22]व्रजदविष्टः[23] ।
दान[24]त्रि**कमल**तुल्यः सहस्र[25]**कमल**सुतगुणौघः ॥३४॥
रिपुर[26]ङ्कुप[27]ञ्च**कमलः** श्रेयश्रीवल्लरी[28]**कमल**तुल्यः ।
गाम्भीर्य[29]**कमल**लश्रीः षट्[30]**कमल** इव व्रती सार्वः ॥३५॥
निर्मलसह[31]स्र**कमला**जलवत्क[32]मलश्रियाऽस्तपूर्णशशी ।
जगति [33]चतुः**कमल**समः समवसृतौ [34]सु**कमल**भ्यपद(:) ॥३६॥
सार्वः [35]**कमल**जनादः श्रेयोनिर्माणप[36]ञ्च**कमल**समः ।
**कमल**[37]जकेतुजिनोक्तावतार[38]**कमल**जनिधिं यच्छन् ॥३७॥

---

१.चन्द्रलाञ्छन, २.सन्देहहरणे शिवो महेशः शिवो हि संहारदक्षः, ३.शिव, ४. रस्यं आस्वादनीयं, ५.तारकदैत्यस्य मरणं यस्मात्स कार्त्तिकेयः, ६.अन्धकमरणो रुद्रः, ७.नरकमरणः कृष्णः, ८. समे समस्ताः काः प्राणिनस्तेषां मरणं हिंसा, ९.मरको मारि, १०. कमलमिव कमलं मस्तकं दशकमलो रावणः, ११.सूर्प्यकदैत्यमरणः कामः, १२.भद्रं मङ्गलं दत्तवान्, १३.चारित्रं निःकलङ्कं अलासीत् गृहीतवान्, १४.नन्दकः खड्गः तं मलते नन्दकमलः कृष्णः स इवाचरतीति नन्दकमलायतीति नन्दकमलायः १५.पद्मनामा निधिः, १६.महापद्मनिधानं, १७.पाकदैत्यस्य मरणं यस्मात् स पाकमरण इन्द्रः, १८.मध्ये को यत्र स मल शब्दः एतावता मकराख्यो निधिः, १९. पृथुको बालस्तस्य मरणं हत्या, यायजूको ब्राह्मणस्तस्य मरणं हत्या, २०. मकरकेतुः कामः, २१.नेत्रः, २२.मलो देवादिपूजायां अश्राद्धः, २३.दूरः, २४. कमलमिव कमलं मस्तकं त्रिकमलशिराः धनदः, २५.सहस्रकमलो सहस्रमस्तकः शेषाहिः, २६.वैरिमृगे, २७. सिंहः पंचाननः, २८. कं पानीयं मलते धरति कमलो मेघः, २९.कं जलं तस्य राशिर्यस्य स कमण्डलः समुद्रः, ३०. षण्मुखः कार्त्तिकेयः, ३१.सहस्रमुखी गङ्गा, ३२.मुख, ३३.ब्रह्मा चतुर्मुखः, ३४. सु शोभनाः काः प्राणिनस्तैर्लभ्यपदः, ३५.कमलं जलं तत्र जायते कमलजः शङ्खः, ३६. पञ्चमुख ईश्वरः, ३७.शंखकेतुर्नेमिजिनः, ३८.शङ्खनामा निधिः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आरक्त[१]कमलयुगलो वीरोऽर्हन् [२]गूढकमलभीतिहरः ।
कमल[३]जभृद्यति दितिजध्वंसे ध्यातो [४]हृदयकमले ॥३८॥
[५]कमलादितपोदेष्टा कविभिः [६]कमलादिचित्रवर्ण्य गुणः ।
नाभि[७]कमलस्वरूपं शंसति सत्यं च कमललये ॥३९॥
कमल[८]वदन्तर्ध्येयं सेव्यं च [९]सहस्रनीलकमलगणैः ।
चम्पकमल[१०]जातिनवश्रीतिल[११]कम[१२]लादिसुमपूज्यः ॥४०॥
वाग्जितपूपकमल[१३]को नैषि वशं त्वकमलभुवां स्त्रीणाम् ।
जनदीपकमल[१४]कोकिलकाकम[१५]लादीन् प्रबोधयसि ॥४१॥
विश्वप्रकाशकमल[१६]प्रभुद्युतिः कनकम[१७]लतनुः सार्वः ।
मानामयजतु[१८]कमलल्युपदेष्टा प्रशमिनां कम[१९]लकायः ॥४२॥ गीतिः ॥
प्रणत[२०]महाकमलाह्वयचक्रधरः कमल[२१]हरिनतः सार्वः ।
पूरयति [२२]कमलवासां सना[२३]कमलवाहनाध्येयः ॥४३॥
यः सार्वकन[२४]कमलसत् तावकमल[२५]यति मुखं स्म तस्यैव ।
नष्टेन[२६] सा[२७]कमलसत् दुर्गतिमयमधि[२८]कमलसच्च ॥४४॥
भक्त्या [२९]पाव[३०]कमलसत्त्वां नायकम[३१]लचयत् शुचिं सस्वम् ।
क्षार[३२]कमलावयद्यस्तस्य भवोदकम[३३]लवदीश ॥४५॥

---

१. कमल इव कमलः पादः, २. गूढपादः सर्पः, ३.कमलजे शङ्खं बिभर्तीति कमलजभृत्कृष्णः स इवाचरतीति कमलजभृद्यति, ४.कमलाकृतिकत्वात्पञ्चपदानि ध्यायेत, ५.कमलनाम्ना तपः, कमलनी ओली प्रसिद्धा, ६.चित्रालङ्कारं, ७.को वायुस्तस्य मलो धरणं रोधनं पवनसाधना तस्य लसे ध्याने नाभिकमलस्वरूपं-नाभौ कमलाकारो वर्त्तते , ८.कमलतपः तपस्विभिः, ९.नीलकमलं नेत्रं सहस्रनेत्र इन्द्रः, १०.पुष्पजाति, ११.पुष्प, १२.पदैकदेशे पदसमुदायो-पचारान्मलो दलामलो दमनकः, तथैव द्वितीयवारे दलामलो दमनकः, १३. मण्डकः, १४. पदैकदेशे पदसमुदायोपचारान्मलो हेमलः स्वर्णकारः, १५.हेमलः सरटः, १६.विमलजिनः, १७. विमलं निर्मलं पदैकदेशे पदसमुदायोपचारात् अत्र ग्राह्यं, १८.हिंगु, १९.एकदेशविकृत-मनन्यवदितिन्यायात्-कमलं कोमलं एकदेशविकृतस्योपलक्षणत्वादनेकदेशविकृतस्याऽपि अनन्यवद्भावात्-को इत्यस्य स्वरव्यञ्जन समुदायस्यापि ग्रहणात्-मल-कोमलमिति - एवं अग्रेऽपि ज्ञेयं, २०.महापद्मचक्री, २१.पद्म वासुदेवः, २२.लक्ष्मी, २३.राजहंसवाहनः, २४.रसण् आस्वादन-स्नेहनयोः - कनकं धत्तूरं अरसत् आस्वादितवान्, २५.तस्य तव मुखमरिरिवाचरति स्म, २६.विट, २७.अरसत् स्तुतवान रसशब्दे, २८.क्रीडितवान्, २९.पवित्रं, ३०.अलसत्-श्लेषितवान् लसश्लेषणक्रीडनयोः, ३१.अरचयत्, ३२.पक्षिपाशं, ३३.लव इव आचरत् अलवन्.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कर्मातङ्क[१]मलघयद्दुर्गति[२]कार्म**कमलो**[३]हयद्यच्च ।
भवकूप[४]**कमल**ने त्वं निःशङ्क**मल**[५]ज्जवोऽसुमताम् ॥४६॥
विनयोद[६]**कमला**सीदेका[७]गारि**कमला**टयद्वीरः ।
सेव[८]**कमला**लयत्कुलनंद**कमल**[९]यस्यपि स्म जगत् ॥४७॥
न्यक्कृत[१०]जतु[११]**कमला**राट् तव पदयुगल[१२]**कमल**ञ्जयद्द्रव्यान् ।
तण्ड[१३]**कमल**क्षमाणः कुगतेस्त्वं [१४]स्व**कमल**क्षयः सिंहात् ॥४८॥
पुण्याद्र[१५]**ङ्कमला**जत्पुण्यमृते क्षोणिनाय[१६]**कमल**ङ्कत् ।
मुखमकल[१७]**ङ्कमला**जद्येन[१८] च जैवातृ**कमला**ञ्छत् ॥४९॥
परिचारकमल[१९]लरङ्क श्रेणि**कमल**राजदीशधर्मेण ।
मुक्तव्यली[२०]कमलतन् मुक्तावस्तो[२१]कमलवयन्महसा ॥५०॥
पाप[२२]**कमल**लापवचो गतसर्वा[२३]रे**कमल**[२४]वणायत तत् ।
उद[२५]**कमला**च्च भवस्याऽसुमत्कदम्ब**कमल**[२६]क्षदिनः ॥५१॥
कीर्त्तिध्वजांशु**कमलो**[२७]पयदात्मवंशे भव्याङ्गिमोद[२८]**कमला**पि वचः सुचारु ।
नो कर्मपेट**कमला**त यतीश तस्य यस्त[२९]च्च तावक**कमलो**[३०]पयति प्रमत्तः ॥५२॥
अज्ञैनरैः सकलम[३१]**ङ्कमले**खयद्यो मुक्त्या च साक**मल**[३२]लास न तीर्थनाथः ।
कान्त्या तथाऽधि[३३]**कमला**र्हततीहितार्थदाता जिनै**कमल**[३४]सि स्म च मर्त्यलोकम् ॥५३॥
यो वै[३५]नयि**कमला**[३६]घत कर्तुं [३७]सूत**कमलो**कयत्तव च ।
परमं लो[३८]**कमला**घीत् स प्रासुं वर्ण**कमल**ब्ध ॥५४॥

---

१.लघुं अकरोत्, २.कर्मशीलः कार्मकः, ३.यत्कर्म लोहमिव आचरत्,४.धारणे, ५.रज्जुरिवाचरः अरज्जवः, ६.अरासीत्, ७.एकागारिकं चौरं अराटयद्दुःखं कारितवान्, ८.सेवकमलालयत्-विलासं कारितवान्, ९.मण्डयसि, १०.लाक्षा, ११.अराराट्, १२.अरञ्जयत्, १३.मायावन्तं, १४.सिंहात्स्वकं आत्मानं अलक्षयः अङ्कितवान्, १५.अराजयत् राजानं अकरोत्, १६.रङ्कमकरोत् अरङ्कयत्, १७.अराजत् शोभितं, १८.येन मुखेन चन्द्रमलाञ्छत् लाञ्छितमकरोत्, १९.रङ्कमाख्यत् धर्मेण रङ्कमपि प्रतिबोधितवान्, २०.रतिं अकरोत्, २१.रविरिवाचरत्, २२.पापकं वचः न ललाप, अकारो निषेधे, २३.सन्देह, २४.रसत्वेन लवणमिवाचरत्, २५.भवस्य संसारस्य उदकमराद्दत्तं-संसारस्य जलाञ्जलिर्दत्त इत्यर्थः, २६.अरक्षत्, २७.अरोपयत्, २८.लपितवान्, २९-३०.तद्वचः प्रमत्तः सन् न लोपयति-अकारो निषेधे, ३१.अङ्कं शास्त्रमलेखयत् लेखितं, ३२.साकं सार्द्धं न ललास न-अपि तु क्रीडित एव-अकारो निषेधे, ३३. रा., ३४.अरजिन इवाचरति स्म, ३५-३६. राघृङ् सामर्थ्ये-विनयं कर्तुं समर्थोऽभूत्, ३७.जन्म, ३८.लाघृङ् सामर्थ्ये ।

वर्णेन [१]सूत**कमले** च यदस्य कीर्त्तिस्तेजःकदम्ब**कमलो**चत वैर्यसह्यम् ॥
स्तुत्याक्षतान्धि**कमला**विभवाँश्च येन निःशेषमीश निजतङ्[२]**कमलो**पि तेन ॥५५॥

आदितः॥८६॥

समारूढो वैनीत[३]**कमल**[४]हयद्याम[५]गृहणे
वनं बिभ्रत्सारं भ्रमर**कमलं**[६]स्ताक्षरपदे ।
पदार्थं विश्वायां **कमल**[७]हयति श्रीजिनवरो
वशाराज्यस्वर्णादि**कमल**[८]हयत्तार्णगणवत् ॥८७॥
मौक्ति[९]**कमलरौ**फलमिह निःशेषं मोह[१०]सौसि**कमलो**[११]ठत् ।
माक्षि**कमलो**[१२]डयन्निजभक्ते वसुरांशु[१३]**कमरौडत्( लौडत् ?)** ॥८८॥
अङ्[१४]**कमलो**भीन्नहि यः पश्यँस्त्ववको**ङ्कमल**विष्ट ।
का[१५]**कमले**यिष्ट गोलाद्यथातथास्माद**कमला**[१६]फीत् ॥८९॥
नाण[१७]**कमल**ते लातुं यतिनां तमसा[१८] न च स्व**कमलेपीत्** ।
शौ**कमल**यते त्वत्संनिधेस्तथौक्ष[१९]**कमलं**फति च ॥९०॥
त्वां हित**कमल**[२०]ङ्घतयः सदिष्टसाध**कमल**[२१]ङ्घयतेऽन्यैः सः ।
येन त्व**कमल**[२२]लङ्घे सोऽपि भवोदकम[२३]लङ्घिष्ट ॥९१॥
ऊष्म**कमल**[२४]ङ्घदाप्त्वा पल्वलमार्द्र**कमल**[२५]ङ्घिकर्मीस्यात् ।
मण्ड**कमल**[२६]लङ्घ यथा त्वन्नाम्नाऽशान्ति**कमला**[२७]घि ॥९२॥

---

१.पारद, २.आतङ्क, ३.वाहनं शबकादि, ४.अरहयत्, ५.व्रतग्रहणे, ६.अरंस्त रमि क्रीडायां मुक्तिपथे, ७.कं पदार्थं न रहयति न जानाति अपितु सर्वान् वेत्ति - रहुण् गतौ गत्यर्था ज्ञानार्था इति, ८.अरहयत् त्यक्तवान् रहण त्यागे तृणसमूहवत्, ९. मौक्तिकं फलं ररौ दत्तवान् अकारः [पादपूर्त्तौ], १०. सौसिके रात्रिधाटी, ११.ल(लु)ठ उपघाते, १२.रोड अनादरे-निजभक्तेन माक्षिकं-मधु अरोडयन् त्याजितवान्, १३.रोड अनादरे-सुरांशुकं देवदूष्यवस्त्रं अरौडत् - न आदृतवान् इत्यर्थः, १४. अङ्कं नाटकं पश्यन्न अलोभीत्-न गृद्धो बभूव, १५. यथा गोलात् काकं-काक-समूहं अडयिष्ट उड्डीनम्, १६. तथाऽस्मात्पुरुषात् अकं दुःखं अराफीत् गतं-रफगतौ, १७.यतिनां नाणकं लातुं अलते निवारयति अली भूष[ण-पर्याप्ति-वारणेषु], १८.तमसा अपि न स्वकं आत्मीयं आत्मानं न अलेपीत्- न लिप्तं चकार, १९.शौकं शुकानां समूहः त्वत्समीपान्न डयते नोड्डीय याति त्वद्वचनमिच्छव इत्यर्थः, २०.उक्ष्णां वृषभाणां समूह औक्षकं त्वत्समीपान्न रम्फति, २१. यस्त्वामलङ्घत उल्लङ्घितवान्, २२.सोऽन्यैर्नलङ्घ्यते, २३.येन त्वं ललङ्घेऽकार आमन्त्रणे, २४.स भवोदकमलङ्घिष्ट, २५.ऊष्मकं उष्णकालं आप्त्वा प्राप्य यथा पल्वलं अलङ्घत्, २६.शुष्कं, लघु शोषणे, २७-२८.मण्डकं आमलकं ललङ्घ शुष्कं तथा त्वन्नाम्नाऽशान्तिकममङ्गलं अलाघि शुष्कम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यदलिपि**कमला**[१]लण्णादत: [२]सादमुक्त:
[३]कलम**कम**[४]**ल**लाडत्ते नय: पावनत्वात् ।
अपि भृत[५]**कमला**[६]लट् संसृते: क्षोणिपं च
अनु[७]पधि**कमला**[८]लस्वंतयेनापदस्ता: ॥९३॥
दाम्भि**कम**[९]**ल**रीत्यगतिं सूच[१०]**कम**[११]**ल**रांचकार [१२]तान्तिपदम् ।
[१३]दांडाजनि**कमल**र्त्ति च विभवं शीत[१४]**कम**[१५]**ला**रयति ॥९४॥
अलक[१६]म**कमल**[१७]चयसि रुचा जित **कमला**बूयसे भवाम्बुनिधौ ।
[१८]फुल्ल**कमल**रचदपि तो अंगार[१९]**कमल**वयञ्जिनो [२०]भृतकम् ॥९५॥
क्षिप्ताङ्गारि**कमल**[२१]वचश्रितं वचस्ते[२२]ऽलिप**कमल**[२३]ङ्क्षिष्ट ।
आसेचन[२४]**कमलो**गं त्वामीडे[२५]ऽनणु**कमल**[२६]घिष्ठम् ॥९६॥
[२७]क्लृप्ताकल्प**कमल**सस्तुल्याङ्गारि[२८]**कमल**लेट् करद्वितयम् ।
कृत्वा वच:प्रमोदं **कमल**[२९]भ्यङ्क**मल**भत नासौ ॥९७॥
पादाम्बुजैरपि तुरु[३०]ष्**कमल**ञ्चकार जेतुं मुखेन च शशाङ्क**मल**म्बभूव ।
लीलाविनाय**कमल**[३१]क्ष्मणमाततान ध्यानेन कण्ट[३२]**कमल**[३३]क्ष्यघसिर्जघान ॥९८॥
त्वं नि: शला[३४]**कमल**यं श्रयसीश लब्ध्वा नि:सङ्कुचहाट**कमला**[३५]यमिन: प्रकुर्वन् ।
तत्त्वप्रकाश**कमल**ब्ध सदोपयोगमापन्निवार[३६]**कम**[३७]**लो**हित लोहितांश: ॥९९॥
नाथस्त्रिलो**कमल**[३८]लज्ञदनञ्जनश्री: सत्याभिवाद[३९]**कमल**[४०]लन्ध्रयश:प्रसारम् ।

---

१.लडि जिह्वोन्मन्थने यङ्लुकि अलालड्, २.विषाद, ३.शालिभेद, ४.अललाडत् मन्थं अकारयत्, ५.कर्मकरं, ६.अलालट् - रक्ष् पालने ह्यस्तन्या दिवि रूपं, ७.निर्दम्भं यथा, ८.मथिता:, ९.अररीति, १०.खलं, ११.अरराञ्चकार, १२.मायाविनं, १३.इक्षुकाण्डं, १४.प्रमत्तं, १५.अरारयति, १६.लिप्तपद्मकेसरं, १७.रचयसि, १८.आश्चर्यं, १९.मङ्गलं, २०.सेवकं, २१.उद्यमवता, २२.भृङ्गं, २३.भ्रमरशब्दमलङ्क्षिष्ट, २४.अरोगं, २५.अनिन्द्यं, २६.महान्तं, २७.अहर्ष, २८.तुल्याअङ्गारिका: किंशुककोरका यस्य तत्तुल्याङ्गारिकं करद्वयं रक्तत्वात् मुकुलभूतत्वात्-एवंविधं करद्वयं कृत्वा यस्तव वच: अलेट् आस्वादितवान् श्रुतवानित्यर्थ:, य: किंविशिष्ट: अलस: लस: श्लेष: - अनाश्लेष इत्यर्थ:, २९. स कं अलभ्यं प्रमोदनं अलभत-अनन्तप्रमोदं लब्धवानित्यर्थ:, ३०.देशं, ३१.अदरिद्रं, ३२.वैरिकं, ३३.अलक्ष्या अदृश्या घसिराहारो यस्य, ३४.अ इति संबोधने - त्वं नि:शलाकं निर्व्यञ्जनं लब्ध्वा लयं ध्यानं श्रयसि, ३५.न विद्यते रै: धनं यस्य स अरा: तं अरायं, ३६.अलोहितं अरक्तं, ३७.लोहितं रुधिरं यस्य, ३८.अललज्ञत्-लज-लजुण् प्रकाशने, ३९.स्तावकं नरं, ४०. निवड ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुर्वन्नृणां [१]तु**कमला**ञ्छितमूर्त्तिरेत[२]द्वाञ्छावतां दददश**ङ्कमल**त्कचेता: ॥१००॥
धर्माक्षेप**क**[३]**मलम**[४] साम्यविडम्ब**कमल**[५]म्यदुर्गतिगम् ।
त्वदनाक्षेप**कमल**[६]जं कुरुषे स्वस्ताव**कमला**ध्यम् ॥१०१॥
कर्मान्तकार**कमल**[७]न्नसि भूमिपीठं व्याप[८]त्प्रमाय**कमल**[९]त्पदिमुख्यधातून् ।
सार्वेशनाम[१०]**कमलं** विमलावबोधे द्रव्यात्मनाऽपि [११]**कमलं** कथयन्त्रयश्री: ॥१०२॥
वक्त्रेण य: [१२]**कमल**वैरिणमाजिगा[१३]य काष्ठास्[१४]यलो**कमल**यन्त [१५]पुनर्नवौघ: ।
सुस्थापना**कमल**मुज्ज्वलमङ्गलश्रीर्निक्षेपत: [१६]**कमल**मीश वदंश्च [१७]भावात् ॥१०३॥
[१८]**कमल**लीशभवेऽपि शिवे तथा [१९]**कम**[२०]**ल**लिन्यतिहा[२१]ववशीकृत: ।
[२२]**कमल**माथितनुद्युतिराशिता **कमल**[२३]वस्तुपरित्यजक: श्रिये ॥१०४॥
[२४]**कमल**धारिनिषेव्यपदाम्बुज: [२५]**कमल**वाचकमीश्वर निक्षि[२६]पन् ।
**कमल**मु[२७]च्यसि देशमनेहसं **कमल**[२८]भव्यमहो **कमलं** वदन् ॥१०५॥
**कमल**चक्रधनूरथवज्रभृत्पदयुग: [२९]**कमल**व्रजवर्जित: ।
**कमल**[३०]वत्यखरांग कथान्तरे कम[३१]लसेननृपं प्रतिपादयन् ॥१०६॥
**कमल**नामकमीश पुरं तथा दयितयानुगतं **कमला**ख्यया ।
सुतवरं प्रवरं **कमलाकरं** **कमल**सामजमादिजिनेशित: ॥१०७॥ युग्मम् ॥
[३२]**कमल**मीश यथा **कमला**[३३]करे कम[३४]लभृत्यपि वा[३५]**कमलं** यथा ।
तदिव सज्जननी**कमलो**[३६]दरे वससि पुंस्**क**[३७]मल: श्रितवैभव: ॥१०८॥

---

१.अपत्य, २.अपत्य, ३.निन्दक, ४.अर[मं], ५.अर[म्यं], ६.अर[जं], रज: पापं अयमकारान्तोऽपि, ७.मङ्डु भूषायां मण्डन्, ८.आपत्राशकं, ९. मण्डति धातु: आदिधातु:, १०.नामस्थापनाद्रव्यभावभेदात्, ११.कमलद्रव्यं, १२.कमलवैरीचन्द्र:, १३.जितवान्, १४-१५.काष्ठा दिशस्तासां आस्यं मुखं तत्र मण्डयन्त: आदर्शस्तद्वत् पु[न]र्नवा नखा यस्य,१६-१७.भावकमलं, १८.क: कामस्तं मन्दयति-कमन् तं आचष्टे कम्-अलङ् अवाञ्छक:, १९.कं जलं तत्र मङ्गतीति कमन् मीन: तां हितवाक्यै: आचष्टे कम्, २०.ललो विलासो यस्या: सा ललिनी स्त्री-अकारो निषेधे, २१.मुखविकार:, २२.क: सूर्यस्तस्य मण्डं शोभां मथतीति, २३.कं चित्तं मलते धरतीति कमलं सच्चित्तं वस्तु, २४.कं सुखं, अण्डधारिण: पक्षिण:, २५.कमलशब्द, २६.कमलं देशं कमलं कालं च निक्षिपन् निक्षेपेण वदन्, २७.उच्यसि-उचच् समवाये-सुखं मेलयसीत्यर्थ:, २८.कमलशब्दज्ञानयोग्यमपि कमलमेव वदन्, २९.शरीरस्वेद, ३०.कमलवती कमलिनी तद्वत्[अ]खरं कोमलमङ्गं यस्य, ३१.कमलसेननृपं कमलाराज्ञानुगतं कमलाकरं पुत्रं तस्य कमलानाम्ना सामजं हस्तिनं कथाविशेषेण प्रतिपादयति, ३२.पद्म, ३३.पद्मसरसि, ३४.धनुर्द्धरौ, ३५.धनु:, ३६. कमलशब्द: शोभार्थे, ३७.पुरुषपुण्डरीक:-कमलं पुण्डरीकं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जयति नाकमलक्रमपूजितः शुकमलत्यपहः प्रतिबोधयन् ।
शुचिविरोकमलण्यकृतव्रतं कमलवंसुरवंह्यऽचरीकर ॥१०९॥
श्रयति नेमिविभो कमलाप्रदारुचितशाकमलोच्छनिषेवितम् ।
शितिकलाकमलल्यति तेजसं कमललन्तु निराश्रवमात्मवित् ॥११०॥
कमललब्धगतिः प्रथमाधिपः कमललप्रतिबोधितसज्जनः ।
जिनमहीकमलङ्गजमानहा कमलने निपुणोऽस्यचिरात्मजः ॥१११॥
चेरकमऽलाताभमुखा महंति तोकमलसावपितरः ।
स्वसविरोधकमलसतरुं खगवत्त्वां कमलन भजन्ते ॥११२॥
कमललरुचोमहेलास्तुरुष्कमलशोभिताः सकमलाढ्याः ।
मात्राढ्यकमलभूषितशिरसः शुभवंदनकमलगीत्रेशम् ॥११३॥
उद्यद्विरोकमलले कमलवतीविजयकथितसुविचारम् ।
पद्मसरोजादिरवान् कथयन्तं कमलपर्यायान् ॥११४॥
रागोत्कलिकमलमकद्युतिर्गुणानेडमूकमलमकवत् ।
बिभ्रद्रुचकमलवणं दोषेनुत्कलिकमलसकं स्तब्धम् ॥११५॥

---

१.नाकं स्वर्गं मलति धरतीति नाकमल इन्द्रः, २.अर[ति], ३.कान्ति, ४. अर[ण्य], ५-६-७. कं अरवं मूकं सुखं, अ न, अचरीकः कृतवान्-सर्वस्य मूकत्वं निर्गमितवान्, ८.सम्पत्, ९.अरुचितं अनभीष्टं शाकं यस्य स-यस्य शाकमनिष्टं स्यात्, १०.अण्डोच्छैः पक्षिभिर्निषेवितं, ११.कृष्णाकला यस्य स कृष्णवर्णः स्यादिति विरोधलेशः, १२.मण्डलं विद्यते यस्य स मण्डली सूर्यस्तद्वत्तेजो यस्य सः, १३.मंडलं वृत्ताकारविशेषः मंडल-मंडलवतोरभेदोपचारात् मंडलं कुंडलं-ततः कस्य सुवर्णस्य मंडले कुंडलं यस्य गृहस्थावस्थायां स तथापि निराश्रवो निर्दोष एवेति, १४.कं परब्रह्म तस्य मंडो विभागः मदुङ परिवेष्टने - विभाजनेऽपि परमते, १५-१६.कः शब्दस्तस्य मानं मः तत्र ललौ जिह्वा विषया क्रिया तेन प्रतिबोधितं, १७ पृथ्वी-मस्तक-मङ् निवासी, १८.कलस्य मंडनं विभागः, १९.ग्रन्थविशेषः, २०.उत्सुक, २१.परमतिनः, २२.अपत्यं, २३.अरोगवंतं, २४. वृक्षभेद, २५.ज्ञानधर, २६.सुवर्णवलय, २७.सुगन्धद्रव्यपरिमलः २८.सजल-मरुबक, २९. कामलो मुकुटः, ३०.मुखमाहति, ३१.भा, ३२.मंडलं, ३३.विजयनाम, ३४.रागस्योत्कलिका कल्लोला यस्य, ३५.अलका पद्मकेसरं तद्वद् द्युतिर्यस्य, ३६.गुणेषु अनेडमूकं अलमको भेकस्तद्वत्, ३७.रुचकं ग्रीवाभरणं बिभ्रत्, अकारः पादपूरणे, ३७अ. रवणः शब्दनः ३८.दोषविषये, ३९.अनुत्कलिकं अलीलं तनोषीति, ४०.अलसो वृक्षविशेषस्तद्व स्तब्धं नरं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्त्वन्मां [1]**कमला**न्त[2]जमुखमथवायौ **कमल**वसानमिनः ।
पाहि **कमला**[3]न्तबान्तं दधतं [4]स**कमल**वसान[5]मयन् ॥११६॥
प्राग्[6]नाशं **कमल**स्य नूतनसरस्याख्यापयन् वादिनां
प्रध्वं[7]सात्**कमल**स्य सारसरसि प्रक्षीणनीरे क्षयम् ।
[8]अन्योन्यापगमं तथा च **कमल**स्याख्यासि वद्भावथा–
त्यन्ताभावमवैषि नाथ **कमल**स्यासारभृत्पल्वले ॥११७॥
**कमलमकमलं** वा भावयुग्मं जगत्यां
**कमल**मिति यनित्यं पर्ययं भाषमाणः ।
कनक**कमल**वल्लीचित्रिते चारुसौधे–
प्यरतिर**कमल**[9]स्या त्वेष विद्वेषभाजः ॥११८॥
**कमला**न्त[10]बादिमं मां क्रीडा[10अ]र्कन्दु**कमला**[11]न्तजाग्रण्यं ।
अयशःप**ङ्कमला**[12]न्तजसमवचसा क्षालयन्पुनीहि विभो ! ॥११९॥
[13]**कमल**सि समस्तभविनां **कमल**वदातस्तवोत्तमः श्लोकः ।
**कमल**[14]ष्टमूर्त्तिभक्तः स्यात्तदसेवी [15]**कमल**बोधः ॥१२०॥
अमिअपर[16]**क्कमल**द्धी अवगय[17]पं[18]**क्कमल**लंतगुणरासी ।
अणव[19]**क्कमल**द्धजओ अणु[20]व**क्कमल**क्ख जिअकालो ॥१२१॥
संवच्छरप्पसरवि**क्कम** लायतुल्लं वित्तायवोम[21]मणि सं**क्कम**[22]लग्[23]गवेलं ।

---

१-२.कंकिलक्षणं अलांतजमुखं अल इति वर्णद्वयं अंते यस्य एवंविधो जो जकार एतावता जाल इति समुखे आदौ यस्य ककारस्य, एतावता जालकं गवाक्षं तुल्यं मां कस्मिन् विषयेऽथ वायौ पापागमे गवाक्षतुल्यं मां पाहीत्यर्थः, ३.कंकिलक्षणं अल इति अंते यस्य स, बो बकार सबल इति अंते यस्य एतावता कंबलं, सकं अलवसानं सकलं वस्तु अयन् जानन् । ४-५. अल इत्यवसाने यस्य एवं भूतं कं कलमित्यर्थः, ६.प्रागभावं, ७.प्रध्वंसो क्षयं-प्रध्वंसाभावं, ८.अन्योन्याभावं, ९.कं जलं अट्टते हिनस्ति कमड् अप्कायविराधकः । न ईदृशो यः स अकमड्, स वैरिणः रिपून् अस्यतु क्षिपतु, १०.अलांतः बः बालः इति द्वयं वर्णयोरादिमं यस्य-कस्य तं बालकं मामित्यर्थः, १०अ. क्रीडायां कन्दुको मुखं यस्यस्तं मां, ११.अलं अंतेयस्य ल इतिवर्णस्य एवं जल इति जडानां मूर्खाणामग्रणी, १२.जलं नीरं तत्समवचसाऽयशः पंकं क्षालन्, १३.कम् अव्ययं सुखार्थे अडति-उद्यमं करोति कम्(कमड् ?), १४.शैवः, १५.स कमड् स्यात्, कं सुखं अट्टते अतिक्रामति सुखरहित इत्यर्थः, १६.पराक्रमो बलं, १७.अज्ञातप्रक्रमः, १८.प्रस्तावः, १९. अप्रक्रमः क्रमोलङ्घनः न ईदृशः अनवक्रमः, २०.निरुपक्रमः लक्ष्यजीवितकालः, २१.व्योममणिः, २२.सङ्क्रमः, २३. लग्नवेला ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अक्खोहं[१] विक्कमल[२]वंग[३]सुगंधसासं दुव्वाइ[४]वग्गवयणक्कमलद्ध[५]लक्खं ॥१२२॥
[६]आयंकमलणयं सुहभावाणु[७]क्कमलसंतसोहग्गो ।
सुरकयंमहनि[८]क्कमलव-पाव[९]पडिक्कमलय[१०]विमुक्को ॥१२३॥
असुहाइ[११]क्कमलम्मो[१२] विहिअउव[१३]क्कमललामसारिच्छो ।
भुवणंमि पुज्ज[१४]कमल [१५]सयकमलय[१६]स्सेणिनमणिज्जो ॥१२४॥
पूर्वं श्रीकमला[१७]सतीसमभवत्त्वद्धर्ममाहात्म्यतो
माञ्जिष्ठद्युतितः सदाप्य[१८]कमलायन्त प्रभो ! ते नखाः
त्वत्सेवानिरतो नयादऽ[१९]कमलाकाम्यज्जनो यश्चिरम् ।
स श्रीमान् जगतीशनाव[२०]कमलावल्लीलयालिङ्गिताः(तः?) ॥१२५॥
कमल[२१]काम्ययतीव तपस्तथा भवदर[२२]स्त्वदु[२३]पासनकाम्ययेत् ।
अक[२४]मलायिभवद्वदनेन नो अ[२५]कमलासिषुराश तवाङ्गनाः ॥१२६॥
त्वद्वक्त्रं [२६]कमलाञ्चकार [२७]कमलन्ती लोचने नाथ ! ते
संवीक्ष्याततिमामभूव[२८]कमलं व्यापद्विलासोज्झितः ।
त्वद्वाक्येऽनिशमो[२९]मकार्षकमलं[३०] कायश्रियां निर्मितौ
धन्यस्तावदहं बभूव[३१] कमलां मुञ्चन् हि मध्यामिति ॥१२७॥
त्वत्कीर्तिकान्ताकमलं जगाहे पर[३२]प्रतापं कमलोत्तराभम् ।
विशिष्य जिग्ये कमला[३३]द्यमन्दंच्छन्दः समूहैः कमलाॅ[३४]र्चनीय ॥१२८॥

---

१.अक्षोभ, २.पराक्रम, ३.देवसुम, ४.दुर्वादिवर्गवचनाक्रम, ५.लब्धलक्षं, ६.आतंकमर्दनकं, ७.अनुक्रमः परिपाटी, ८.निःक्रमलवः चारित्रकलः, ९.कर्मविनाशः, १०.रजः पापं, ११.अतिक्रमः, १२.रम्यः, १३.बल, १४.क्रम, १५.सरजपदकमलं, १६.क्रमलता-उत्तमनराः, १७.नाम्ना, १८.कमलमिवाचेरुः, १९.कमलां लक्ष्मीमैच्छत-अकमलाकाम्यत्, २०.कमलावन्तमाढ्यं नरमाचष्टे स्म अकमलावत्- एवंविधे सलीलया लक्ष्मीवन्तमपि न जल्पयतीत्यर्थः २१.यथा तपा उष्णकालः कमलकाम्ययतीव-जलस्य इच्छां कारयतीत्यर्थः, २२-२३.तथा तेन प्रकारेण भवदरः संसारभीतिः त्वदुपासनकाम्ययेत्, त्वत्सेवा[या]मिच्छां कारयति-संसारभीता-जीवास्त्वत्सेवाभिलाषुका भवन्तीत्यर्थः, २४.कमलमिवाचर्यते स्म, २५.लक्ष्मीरिवाचरितवत्यः, २६.कमलमिवाचचार, २७.कमल-मिवाचरन्ति, २८.अलं लकाररहितं विलास इत्यत्र लकारापगमे व्यास इति, २९.अहं त्वद्वाक्यं स्वीकृतवानित्यर्थः, ३०.अरं काय अर नामा जिनस्तस्यां को ध्वजो नन्द्यावर्त्तो तद्वदाचरित यः तस्य सम्बोधनम्, ३१.जात, ३२.वैरिप्रतापं किंभूतं कुसुंभं कमलोभरं-तद्वर्णभ्रष्टवर्णम्, ३३. कमलनामा पिंगलप्रसिद्धच्छन्दः तैर्विशिष्यो वर्णनीयः, ३४. महिला ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं यः **कमला**[1]भिधानसुमनःस्तोमैः श्रिया निर्मलै-
र्निर्माय प्रवरार्थसौरभभरैः स्तोत्रस्रजं सद्गुणाम् ।
भक्त्या **श्रीवृषभाख्य**विष्टपविभोरारोपयत्यादरात्
तस्यासौ वरमालिकां शिवरमाकण्ठे निदेधीयते ॥१२९॥
भक्त्या श्रीयुत**शान्ति**विष्टपविभोरारोपयत्यादरात् ।
एवं पार्श्व-नेमि-वीराणामपि नामानि क्षेप्यानि

[2]सद्योगैः **कमलादिमैः** कृतजनिर्दिष्टे[3] विशे(शि)ष्टे स्फुर-
**लक्ष्मीसागर**उल्लसत्**सुमतिसाधु**प्राप्यसद्दर्शनः ।
तेजोराजिविराजि**हेमविमल**प्राज्यप्रतापोदयः
**सश्रीआदिजिनः सहर्षकुलजः** कुर्यादहार्याः श्रियः ॥१३१(३०)॥
**सश्रीशान्तिजिन**-इत्यादि स्वयं ज्ञेयम् ।

पं **हर्षकुलगणि** कृता **कमलपञ्चशतिका** ॥ **श्रीसोमविमलसूरिणा**
स्वकृते शोधिता ॥श्रीरस्तु॥

---

१.कमलं पद्मं तस्योपलक्षणत्वात् शेषपुष्पग्रहणम् ॥ २. कमलयोगो जन्मपत्रिकायां सतां जायते, स ज्योतिर्विदां प्रसिद्धः । ३.स्यात्कालः समयो दिष्टः काल इत्यर्थः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org